

# शिवाष्टकम्

Temples.bio

नीचे दिए गए यूआरएल शिवाष्टकम् का जाप करना और सुनना सीखें।

www.temples.bio/s-22

प्रभुं प्राणनाथं विभुं विश्वनाथं
जगन्नाथ नाथं सदानन्द भाजाम् ।
भवद्भव्य भूतेश्वरं भूतनाथं
शिवं शंकरं शम्भु मीशानमीडे ॥ 1 ॥
गले रुंडमालं तनौ सर्पजालं
महाकाल कालं गणेशादि पालम् ।
जटाजूट गंगोत्तरंगैर्विशालं
शिवं शंकरं शम्भु मीशानमीडे ॥ 2 ॥

मुदामाकरं मण्डनं मण्डयन्तं
महा मण्डलं भस्म भूषाधरं तम् ।
अनादिं ह्यपारं महा मोहमारं
शिवं शंकरं शम्भु मीशानमीडे ॥ 3 ॥
वटाधो निवासं महाट्टाट्टहासं
महापाप नाशं सदा सुप्रकाशम् ।
गिरीशं गणेशं सुरेशं महेशं
शिवं शंकरं शम्भु मीशानमीडे ॥ 4 ॥

गिरीन्द्रात्मजा संगृहीतार्धदेहं
गिरौ संस्थितं सर्वदापन्न गेहम् ।
परब्रह्म ब्रह्मादिभिर्वन्द्यमानं
शिवं शंकरं शम्भु मीशानमीडे ॥ 5 ॥
कपालं त्रिशूलं कराभ्यां दधानं
पदाम्भोज नम्राय कामं ददानम् ।
बलीवर्दयानं सुराणां प्रधानं
शिवं शंकरं शम्भु मीशानमीडे ॥ 6 ॥

शरच्चन्द्र गात्रं गणानन्दपात्रं
त्रिनेत्रं पवित्रं धनेशस्य मित्रम् ।
अपर्णा कलत्रं सदा सच्चरित्रं
शिवं शंकरं शम्भु मीशानमीडे ॥ 7 ॥
हरं सर्पहारं चिता भूविहारं
भवं वेदसारं सदा निर्विकारम् ।
श्मशाने वसन्तं मनोजं दहन्तं
शिवं शंकरं शम्भु मीशानमीडे ॥ 8 ॥

स्वयं यः प्रभाते नरश्शूल पाणे
पठेत् स्तोत्ररत्नं त्विहप्राप्यरत्नम् ।
सुपुत्रं सुधान्यं सुमित्रं कलत्रं
विचित्रैः समाराध्य मोक्षं प्रयाति ॥ 9 ॥



Temples.bio

नीचे दिए गए यूआरएल शिवाष्टकम् जाप करना और सुनना सीखें।
www.temples.bio/s-22